**चतुर्दशः पाठः**

# समयस्य सदुपयोगः

**बहुभाग्योदयेन एव मानवजीवनं प्राप्यते। एतज्जीवनं देवानां कृते अपि दुर्लभं वर्तते। जीवनस्य उन्नत्यै आलस्यं विहाय अहर्निशम् उत्तमानि कार्याणि करणीयानि यतोहि विगत: समय: पुनर्नागच्छति। पाठेऽस्मिन् संवादमाध्यमेन समयस्य महत्त्वं प्रतिपादितम्।**

**आचार्य:** - छात्रा: ! मानवजीवनस्य उन्नत्यै अतिमहत्त्वपूर्णं किं भवति ?

**छात्रा:** - परिश्रम:, अध्ययनं, परोपकार:, समय: इत्यादय:।

**आचार्य:** - आम् मानवजीवनस्य उन्नत्यै विभिन्नानि महत्त्वपूर्णाङ्गानि सन्ति किन्तु तेषु समयस्य सदुपयोग: अर्थात् सत्सु कार्येषु उपयोग: महत्त्वपूर्ण: वर्तते।

**छात्रा:** - कथम् एतत् ?

**आचार्य:** - समयो हि अन्येषां वस्तूनाम् अपेक्षया अधिक: महत्त्वपूर्ण: अधिकश्च मूल्यवान् वर्तते। अन्यानि वस्तूनि विनष्टानि पुनरपि लब्धुं शक्यन्ते; परं समयो विनष्टो न केनापि उपायेन पुन: परावर्तयितुं शक्यते यस्य आयुषो यावान् अंश: निरर्थक: गत: स: गत: एव।

**छात्रा:** - जना: समयस्य दुरुपयोगं कथं-कथं कुर्वन्ति ?

**आचार्य:** - जना: द्विधा समयस्य दुरुपयोगं कुर्वन्ति-व्यर्थयापनेन अकार्यकरणेन च। अनेके जना: कार्यसम्पादने समर्था अपि निरर्थकं समयं यापयन्ति। इतो भ्रमन्ति ततो भ्रमन्ति अप्रयोजनं गृहे-गृहे अटन्ति। न ते स्वार्थाय एव किञ्चित् कार्यं कुर्वन्ति न वा परार्थाय एव। देवदुर्लभमिदं मानवशरीरं लब्ध्वापि ये न अध्ययनं कुर्वन्ति न धर्मम् आचरन्ति न धनम् उपार्जयन्ति न वा मुक्तये प्रयासं कुर्वन्ति तेषां जन्म निरर्थकं भवति तथा इयं कर्मभूमि: एतादृशानां निष्क्रियाणां भारं वोढुं नेच्छति।

**छात्रा:** - आचार्य ! ये जना: जीवने समयस्य सदुपयोगं न कुर्वन्ति ते कां क्षतिम् अनुभवन्ति ?

**आचार्य:** - ईदृशाः जनाः केभ्यः अपि न रोचन्ते न वा कश्चित् आश्रयमेव दातुमिच्छति। स यत्रैव गच्छति तत: एव बहिष्क्रियते सर्वत्र च तिरस्कृतो भवति। किमधिकं पितरौ अपि एतादृशं तनयं नाभिनन्दत: का पुनरन्येषां बन्धुबान्धवानां वार्ता।

**छात्रा:** - आचार्य ! ये जना: जीवने समयस्य सदुपयोगं कुर्वन्ति तेषां जीवनं कथं भवति ?

**आचार्य:** - ये जना: कदापि समयस्य दुरुपयोगं न कुर्वन्ति सदैव कार्यसंलग्ना: तिष्ठन्ति न च परिश्रमात् आत्मानं गोपयन्ति तेषां सुखेन निर्वाहो भवति। ते यत्रैव गच्छन्ति तत्रैव सादरं रक्ष्यन्ते गृहे बहिश्च सर्वत्रैव समानरूपेण अभिनन्द्यन्ते। सर्वे एव तेषां सहयोगमिच्छन्ति। तादृशा: एव च कर्मवीरा: जना: समाजे सर्वत्र समाद्रियन्ते श्रेष्ठपदं च लभन्ते।

**छात्रा:** - आचार्य ! समयस्य सदुपयोगै: जना: काम् उन्नतिं प्राप्नुवन्ति ?

**आचार्यः** - शृण्वन्तु-अद्यावधि ये- महापुरुषा: जगति प्रसिद्धा: अभवन् तेषां जीवनचरित्रस्य अध्ययनेन ज्ञायते यत् ते बाल्यकालादेव अहोरात्रं कर्मपरायणा आसन् एकमपि क्षणं निरर्थकं नहि नीतवन्त:। ''कार्यं वा साधयेयम् देहं वा पातयेयम्'' इत्येव तेषां लक्ष्यं बभूव। एतस्मात् एव कारणात् अद्यापि गृहे-गृहे तेषां गौरवगाथा गीयते आदर्शपुरुषाश्च मन्यन्ते। यदि भगवान् शङ्कराचार्य: अहोरात्रं परिश्रमं न अकरिष्यत् समस्तेऽपि भारते दिवानिशं न अभ्रमिष्यत्, स्थले-स्थले विरोधिनां सिद्धान्तं न अखण्डयिष्यत् तर्हि पुन: भारते वैदिकधर्मस्य प्रचार: न अभविष्यत्। गान्धि-सुभाषचन्द्र-चन्द्रशेखरादय: भारतीया: कठिनपरिश्रमेण समयस्य सदुपयोगं कृत्वा गौराङ्गजनान् देशात् बहि: कृतवन्त: स्वराज्यं च प्राप्तवन्त: तथा च ये छात्रा: क्षणं-क्षणं संयोज्य विद्याध्ययने समयस्य सदुपयोगं कृतवन्त: ते एव विद्वान्स: उच्चनागरिका:, अधिकारिण: वा अभवन्।

**छात्रा:** - आचार्य ! प्रकृतिरपि किं समयस्य पालनं शिक्षयति ?

**आचार्यः** - आम् 'प्रकृतिरपि समयस्य पालनं, कार्यपरायणताम् एव उपदिशति निरन्तरम्'। प्रकृतौ यावन्त: पदार्था: सृष्टा: सन्ति ते सर्वेऽपि अहोरात्रं कार्यसंलग्ना एव दृश्यन्ते। सूर्य-चन्द्राभ्याम् आरभ्य कीट-पतङ्ग-पिपीलिका-पर्यन्तं सर्वेऽपि स्व-स्व व्यापारे व्यापृता: विलोक्यन्ते। अत: प्रकृत्या अपि इयमेव शिक्षा दीयते यत् नहि केनापि समयस्य अनुपयोग: कर्त्तव्य: इति।

अत: अस्माभि: आलस्यं विहाय सर्वदैव समयस्य सदुपयोग: कर्त्तव्य: न तु कदाचित् एकमपि क्षणं व्यर्थं यापनीयम्। यथोक्तम् -

''न कार्यकालमतिपातयेत्''।

## शब्दार्थ:

लब्धुम् - प्राप्त करने योग्य। परावर्तयितुम् - लौटाने के लिए। उपार्जयन्ति - कमाते हैं। वोढुम् - ढोने के लिए। गोपयन्ति - छिपाते हैं। बभूव - हुआ। अकरिष्यत् - किया होता। अतिपातयेत् - अधिक लगाएँ।

## अभ्यास:

1. **एकपदेन उत्तरं लिखत -**

(क) देवदुर्लभं किम् ?

(ख) अन्येषां वस्तूनाम् अपेक्षया अधिक: महत्त्वपूर्ण: क: ?

(ग) किं परावर्तयितुं न शक्यते ?

(घ) जना: समयस्य दुरुपयोगं कतिधा कुर्वन्ति ?

(ङ) निष्क्रियाणां भारं वोढुं का नेच्छति ?

**2. एकवाक्येन उत्तरं लिखत –**

(क) मानवजीवनस्य उन्नत्यै अतिमहत्त्वपूर्णं किं भवति ?

(ख) के अप्रयोजनं गृहे-गृहे अटन्ति ?

(ग) प्रकृतिरपि किं शिक्षयति ?

(घ) कीदृशा: छात्रा: उच्चनागरिका: अभवन् ?

(ङ) अस्माभि: किं कर्त्तव्यम् ?

**3. अधोलिखितप्रश्नानाम् उत्तराणि लिखत –**

(क) जना: समयस्य दुरुपयोगं कथं कुर्वन्ति ?

(ख) केषां जन्म निरर्थकं भवति ?

(ग) के जना: सर्वत्र तिरस्कृता: भवन्ति ?

**4. प्रदत्तशब्दै: रिक्तस्थानानि पूरयत –**

(निष्क्रियाणां, समय:, कार्यं, सहयोगम्, तनयं)

(क) अन्येषां वस्तूनाम् अपेक्षया ...................अधिक: महत्त्वपूर्ण: वर्तते।

(ख) कर्मभूमि: ............................ भारं वोढुम् नेच्छति।

(ग) पितरौ अपि एतादृशं ................... नाभिनन्दत:।

(घ) .................... वा साधयामि।

(ङ) सर्वे एव तेषां .................... इच्छन्ति।

**5. यथायोग्यं योजयत –**

| ‘अ’ | ‘आ’ |
|---|---|
| (क) कार्यं वा साधेययम् | अतिपातयेत् |
| (ख) अधिक: मूल्यवान् | कर्त्तव्य: |
| (ग) न कार्यकालम् | देहं वा पातेययम् |
| (घ) महापुरुषा: | समय: |
| (ङ) समयस्य सदुपयोग: | प्रसिद्धा: |

6. **शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत -**

(क) अस्माभिः समयस्य सदुपयोगः कर्त्तव्यः । ☐

(ख) परिश्रमः अस्माकं जीवनस्य उन्नत्यै भवति । ☐

(ग) मानवशरीरं देवदुर्लभं नास्ति । ☐

(घ) भगवान् शङ्कराचार्यः अहोरात्रं परिश्रमं कृतवान् । ☐

(ङ) कार्यकालमतिपातयेत् । ☐

7. **अधोलिखितशब्दानां मूलशब्दं विभक्तिं वचनञ्च लिखत -**

| शब्दः | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा -कार्येषु | कार्य | सप्तमी | बहुवचनम् |
| (क) विद्वान्सः | | | |
| (ख) अपेक्षया | | | |
| (ग) स्वार्थाय | | | |
| (घ) गृहे | | | |

8. **अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत -**

| पदम् | | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|---|
| यथा -यथोक्तम् | - | यथा + उक्तम् = | गुणसन्धिः |
| (क) अधिकश्च | | | |
| (ख) यत्रैव | | | |
| (ग) केऽपि | | | |
| (घ) अद्यावधिः | | | |

9. **अधोलिखितपदानां समासविग्रहं कृत्वा समासनाम लिखत -**

यथा - पितरौ - माता च पिता च द्वन्द्वसमासः

(क) कार्यकालम्

(ख) जीवनचरित्रस्य

(ग) महापुरुषाः

(घ) अहोरात्रम्

10. **रेखाङ्कितपदान्याधृत्य प्रश्ननिर्माणं कुरुत -**

(क) **समयः** अधिकमहत्त्वपूर्णः अस्ति ।

(ख) केचिज्जनाः **समयस्य** दुरुपयोगं कुर्वन्ति ।

(ग) **पितरौ** तनयं नाभिनन्दतः ।

(घ) सर्वे एव **तेषां** सहयोगमिच्छन्ति ।

(ङ) एकमपि **क्षणं** व्यर्थं न यापनीयम् ।

## योग्यताविस्तारः -

- ये महापुरुषाः समयस्य सदुपयोगं कृत्वा देशहिताय समाजहिताय धर्महिताय वा कार्याणि कृतवन्तः तेषां नामानि अन्विष्य लिखत ।
- एवमेव मानवजीवनोपयोगिविषयोपरि संवादलेखनं कुरुत ।